FOR REFERENCE ONLY

# चिकित्सासारसंग्रहस्य सूचीपत्रम् ।


| विषय | पृष्ठाङ्कः | विषय | पृष्ठाङ्कः |
|---|---|---|---|
| मुखबन्धाधिकार: | १ | दाहाधिकार: | २९७ |
| ज्वराधिकार: | १२ | उन्मादाधिकार: | ३०० |
| अतिसाराधिकार: | ७५ | अपस्माराधिकार: | ३१० |
| ग्रहण्यधिकार: | १०६ | वातव्याध्यधिकार: | ३१६ |
| अर्शोऽधिकार: | १३० | वातरक्ताधिकार: | ३७१ |
| अजीर्णाधिकार: | १६९ | ऊरुस्तम्भाधिकार: | ३९० |
| विसूचिकाधिकार: | १८२ | आमवाताधिकार: | ३९२ |
| अलसकाधिकार: | १८२ | शूलाधिकार: | ४०४ |
| विलम्बिकाधिकार: | १८४ | उदावर्त्ताधिकार: | ४२६ |
| भस्मकाधिकार: | १८५ | आनाहाधिकार: | ४३० |
| अग्न्यधिकार: | १८६ | गुल्माधिकार: | ४३२ |
| पाण्डुरोगाधिकार: | १९० | हृद्रोगाधिकार: | ४४७ |
| कामलारोगाधिकार: | १९६ | उरोग्रहाधिकार: | ४५२ |
| हलीमकाधिकार: | १९८ | मूत्रकृच्छ्राधिकार: | ४५२ |
| रक्तपित्ताधिकार: | २०२ | मूत्रघाताधिकार: | ४५७ |
| राजयक्ष्माधिकार: | २२० | अश्मरीरोगाधिकार: | ४६२ |
| क्षतक्षयाधिकार: | २३५ | प्रमेहाधिकार: | ४७२ |
| कासाधिकार: | २४० | मेदोरोगाधिकार: | ४८३ |
| हिक्काधिकार: | २५८ | उदररोगाधिकार: | ४९० |
| श्वासाधिकार: | २६२ | शोथाधिकार: | ५१३ |
| स्वरभेदाधिकार: | २६९ | अण्डवृद्ध्यधिकार: | ४१६ |
| अरोचकाधिकार: | २७३ | ब्रध्नरोगाधिकार: | ४३१ |
| छर्दिरोगाधिकार: | २७७ | गलगण्डाधिकार: | ५३२ |
| तृष्णाधिकार: | २८४ | गण्डमालाधिकार: | ५३५ |
| मूर्च्छाधिकार: | २८८ | ग्रन्थिरोगाधिकार: | ५३८ |
| मदात्ययाधिकार: | २९१ | अर्बुदाधिकार: | ५४१ |

| विषय | पृष्ठाङ्क: | विषय | पृष्ठाङ्क: |
|---|---|---|---|
| श्लीपदाधिकार: | ५४१ | जलदोषवीर्य्यस्तम्भादियोगाधिकार: | ८५९ |
| विद्रधिरोगाधिकार: | ५४८ | रसायनाधिकार: | ८६१ |
| व्रणशोथाधिकार: | ५५५ | वाजीकरणाधिकार: | ९०७ |
| व्रणरोगाधिकार: | ५५६ | स्नेहपानाधिकार: | ९१७ |
| आगन्तुव्रणाधिकार: | ५६४ | स्वेदाधिकार: | ९२१ |
| भग्नाधिकार: | ५७३ | वमनाधिकार: | ९२३ |
| नाड़ीव्रणाधिकार: | ५७७ | विरेचनाधिकार: | ९२६ |
| भगन्दराधिकार: | ५८१ | वस्तिकर्माधिकार: | ९३२ |
| उपदंशाधिकार: | ५८५ | धूमपानाधिकार: | ९५२ |
| शूकदोषाधिकार: | ५८८ | कवलाधिकार: | ९५५ |
| कुष्ठरोगाधिकार: | ५९२ | नस्याधिकार: | ९५७ |
| श्वित्ररोगचिकित्साधिकार: | ६१७ | स्वस्थवृत्ताधिकार: | ९६१ |
| उदर्दशीतपित्तकोठाधिकार: | ६२१ | द्रव्यगुणाधिकार: | ९६६ |
| अम्लपित्ताधिकार: | ६२३ | प्रतिनिधिद्रव्याधिकार: | ९७१ |
| विसर्पाधिकार: | ६३१ | द्रव्यगणपाठाधिकार: | ९७३ |
| विस्फोटाधिकार: | ६३७ | संशोधनसंशमनरसद्रव्यादीनां वर्गाधिकार: | ९७८ |
| स्नायुरोगाधिकार: | ६४० | ऋतुचर्य्याधिकार: | ९८१ |
| मसूरिकाधिकार: | ६४१ | धान्यवर्गाधिकार: | ९८५ |
| क्षुद्ररोगाधिकार: | ६५० | मांसवर्गाधिकार: | ९८७ |
| मुखरोगाधिकार: | ६७३ | फलवर्गाधिकार: | ९८९ |
| कर्णरोगाधिकार: | ६९३ | व्यञ्जनमांसव्यञ्जनयोरधिकार: | ९९५ |
| नासारोगाधिकार: | ७०३ | मत्स्यव्यञ्जनगुणाधिकार: | १००० |
| नेत्ररोगाधिकार: | ७१३ | द्रवद्रव्याधिकार: | १००२ |
| शिरोरोगाधिकार: | ७६३ | अरिष्टाधिकार: | १०१० |
| स्त्रीरोगाधिकार: | ७७४ | दीपनपाचनद्रव्यलक्षणाधिकार: | १०२८ |
| बालरोगाधिकार: | ८११ | | |
| विषाधिकार: | ८३९ | | |

आदौ दृग्धस्ततः स्पर्शाच्छीतादिप्रश्नतः परम् ॥ ११ ॥
कृच्छ्रोपायः सुखोपायो द्विविधः साध्य उच्यते।
असाध्यो द्विविधो ज्ञेयो याप्यो यश्चाप्रतिक्रियः ॥ १२ ॥
याप्याः केचित् प्रकृत्यैव साध्या याप्या उपेक्षिताः।
स्वभावाद्व्याधयः साध्याः केचिद्याप्या उपेक्षिताः ॥ १३ ॥
साध्या याप्यत्व मायान्ति याप्याश्चासाध्यतां तथा।
घ्नन्ति प्राणानसाध्यास्तु नराणां निष्क्रियावताम् ॥ १४ ॥
जातमात्रश्चिकित्स्यस्तु नोपेक्ष्योऽल्पतया गदः।
वह्निशत्रुविषैस्तुल्यः स्वल्पोऽपि विकरोत्यसौ ॥ १५ ॥
स च प्रकुपितो दोषः समुत्थानविशेषतः।
स्थानान्तरगतश्चापि विकारान् कुरुते बहून् ॥ १६ ॥
निवृत्तेऽपि पुनर्व्याधिः स्वल्पेनायाति हेतुना।
क्षीणे मार्गे कृते दोषैः शेषः सूक्ष्म इवानलः ॥ १७ ॥
कर्मजा व्याधयः केचिद्दोषजाः सन्ति चापरे।
कर्मदोषोद्भवाश्चान्ये कर्मजास्ते स्वहेतुकाः ॥ १८ ॥
यथा शास्त्रन्तु निर्णीतो यथा व्याधिश्चिकित्सितः।
न शमं याति यो व्याधिः स ज्ञेयः कर्मजो बुधैः ॥ १९ ॥
स्वल्पदोषो गरीयान् यः स ज्ञेयः कर्मदोषजः।
कर्मक्षयात्कर्मकृतो दोषजः स्वस्वभेषजैः।
कर्मदोषोद्भवो याति कर्मदोषक्षयात् क्षयम् ॥ २० ॥
नास्ति रोगो विना दोषैर्यस्मात्तस्माच्चिकित्सकः।
अनुक्तमपि दोषाणां लिङ्गैर्व्याधिमुपाचरेत् ॥ २१ ॥
विकाराणामकुशलो न जिह्रीयात् कदाचन।
न हि सर्वविकाराणां नामतोऽस्ति ध्रुवा स्थितिः ॥ २२
यथा विषं यथा शस्त्रं यथाग्निरशनिर्यथा।
तथौषधमविज्ञातं विज्ञातममृतं यथा ॥ २३ ॥

मुष्णाम्बुना कफसमीरणगुल्मनाशं।
हृत्पार्श्वपृष्ठजठरार्तिविषूचिकासु
पेयं तथा यवरसेन च विड्विबन्धे ॥ ८२ ॥

क्वाथेन चूर्णपानञ्च यत्र क्वाथप्रधानता ।
प्रवर्त्तते न तेनायं चूर्णापेक्षाचतुर्गुणः ॥ ८३ ॥
हिङ्गुलः स्वल्पमानोऽत्र समभागे सहार्यता ॥ ८४ ॥

इति रुचकादिचूर्णम् ।

त्रिफलाक्वाथगोमूत्रक्षौद्रक्षीररसैः पृथक् ।
एरण्डतैलैर्द्विगुणैर्हितं गुल्मे विरेचनम् ॥ ८५ ॥
हिङ्गुतैलं सलवणं गोमूत्रेण विपाचितम् ।
नाभिस्थाने प्रदातव्यं यस्य शूलं सवेदनम् ॥ ८६ ॥
दारुहैमवतीकुष्ठशताह्वाहिङ्गुसैन्धवैः ।
अम्लपिष्टैः सुखोष्णैश्च शूलार्त्तमुदरं दिहेत् ॥ ८७ ॥

इति दारुषट्कलेपः ।

पुनर्नवैरण्डयवातसीभिः
कार्पासजैरस्थिभिरारनालैः ।
स्विन्नैरमीभिर्भिषजा च कार्य्यः
स्वेदः समीरार्त्तिहरो नराणाम् ॥ ८८ ॥

इति पुनर्नवादिस्वेदः ।

तैलमेरण्डजं वापि दशमूलस्य वारिणा ।
पीतं निहन्ति साटोपं हिङ्गु सौवर्च्चलान्वितम् ॥ ८९ ॥
पथ्यां सशक्रयवपुष्करमूलशुण्ठीं
निष्क्वाथ्य हिङ्गुजटिलातिविषासुयुक्ताम् ।
पीत्वा सुखोष्णमथ वातकृतञ्च शूल-
मामोद्भवं कफकृतञ्च निहन्ति तूर्णम् ॥ ९० ॥
मातुलुङ्गरसो वापि त्रिवृत्क्वाथस्तथापरः ।

गुग्गुलुस्तालमूली च त्रिफलाखदिरं वृषम्।
त्रिवृतालम्बुषा शुण्ठी निर्गुण्डीचित्रकस्तथा ॥ १० ॥
एषां दशपलान् भागां स्तोये पञ्चाढ़के पचेत्।
पादशेषं ततः कृत्वा कषायमवतारयेत् ॥ ११ ॥
पलद्वादशकं देयं रुक्मलोहं सुचूर्णितम्।
पुराणसर्पिषः प्रस्थं शर्कराष्टपलान्वितम् ॥ १२ ॥
पचेत्ताम्रमये पात्रे सुशीते चावतारिते।
प्रस्थार्द्धं माक्षिकं देयं शिलाजतु पलद्वयम् ॥ १३ ॥
एलात्वचः पलार्द्धञ्च विड़ङ्गानि पलत्रयम्।
मरिचाञ्जनकृष्णा द्वे द्विपलं त्रिफलान्वितम् ॥ १४ ॥
पलद्वयन्तु कासीसं सूक्ष्मचूर्णीकृतं बुधैः।
चूर्णं दत्त्वा सुमथितं स्निग्धे भाण्डे निधापयेत् ॥ १५ ॥
ततः संशुद्धदेहस्तु भक्षयेदक्षमात्रकम्।
अनुपानं पिबेत् क्षीरं जाङ्गलानां रसं तथा ॥ १६ ॥
वातश्लेष्महरं श्रेष्ठं कुष्ठमेदोहरं परम्।
कामलापाण्डुरोगघ्नं श्वयथुं सभगन्दरम् ॥ १७ ॥
मूर्च्छामोहविषोन्मादं गराणि विषमाणि च।
स्थूलानां कर्षणं श्रेष्ठं मेदुरे परमौषधम् ॥ १८ ॥
कर्षयेच्चातिमात्रेण कुक्षिं पातालसन्निभम्।
बल्यं रसायनं मेध्यं वाजीकरणमुत्तमम् ॥ १९ ॥
श्रीकरं पुत्रजननं वलीपलितनाशनम्।
नाशीयात्कदलीकन्दं काञ्जिकं करमर्दकम्।
करीरं कारवेल्लञ्च षट्ककाराणि वर्जयेत् ॥ ४० ॥

इति लोहरसायनम्

सालसारादिनिर्यूहं चतुर्थांशावशेषितम्।
परिस्रुतं ततः शीतं मधुना मधुरीकृतम् ॥ ४१ ॥

## अथ ग्रन्थिनिदानमाह।

ातादयो मांसमसृग्प्रदुष्टाः संदूष्य मेदश्च तथा शिराश्च।
ृत्तोन्नतं विग्रथितं तु शोथं कुर्वन्त्यतो ग्रन्थिरिति प्रदिष्टः ॥१॥
ायम्यते वृश्चति तुद्यते च प्रभज्यते मथ्यति भिद्यते च।
ृष्णो मृदुर्वस्तिरिवाततश्च भिन्नः स्रवेच्चानिलजोऽस्रमच्छम् ॥२॥
दन्दह्यते धूप्यति चूष्यते च पापच्यते प्रज्वलतीव चापि।
रक्तः सपीतोऽप्यथवापि पित्ताद्भिन्नः स्रवेदुष्णमतीव चास्रम् ॥३॥
ीतो विवर्णोऽल्परुजोऽतिकण्डूः पाषाणवत्संहननोपपन्नः।
ाराभिवृद्धिश्च कफप्रकोपाद्भिन्नः स्रवेच्छुक्लघनं च पूयम् ॥४॥
ीरवृद्धिक्षयवृद्धिहानिः स्निग्धो महान् कण्डुयुतोऽरुजश्च।
दः कृतो गच्छति चात्र भिन्ने पिण्याकसर्पिः प्रतिमन्तु मेदः॥५॥
ायामजातैरबलस्य तैस्तैराक्षिप्य वायुश्च शिराप्रतानम्।
ोच्य सम्पीड्य विशोष्य चापि ग्रन्थिं करोत्युन्नतमाशु वृत्तम्॥६
न्थिः शिराजः स तु कृच्छ्रसाध्यो भवेद्यदि स्यात् सरुजश्चलश्च।
ारुक् स एवाप्यचलो महांश्च मर्मोत्थितश्चापि विवर्जनीयः ॥७॥

### अथ चिकित्सामाह।

्रन्थिष्वथामेषु भिषग्विदध्याच्छोथक्रियां विस्तरतो विधिज्ञः।
ेदलं चास्य नरस्य नित्यं तद्रच्चितं व्याधिबलं निहन्ति ॥८॥
ंस्रा सरोहिण्यमृताथ भार्गी श्योनाकविल्वागुरुकृष्णगन्धाः।
ोपित्तपिष्टाः सह तालपत्रा ग्रन्थौ विधेयोऽनिलजे प्रलेपः ॥९॥
कुर्यात् स्वेदोपनाहांश्च तथान्यान् सिद्धलेपनान् ॥ १० ॥
दार्य्य वा पक्वमपोह्य पूयं प्रक्षाल्य विल्वार्कनरेन्द्रतोयैः।
ैश्च पञ्चाङ्गुलपत्रमिश्रैः संस्वेदयेत् सैन्धवसंप्रयुक्तैः ॥ ११ ॥
ं व्रणञ्चाप्युपरोहयेत्तु तैलेन रास्नासरलान्वितेन।

निपात्य शस्त्रं तिलनागदन्तीमञ्जिष्ठकल्कैः परिपूरयेच्च ॥
क्षालने चापि हरिद्रसोमनिम्बाः प्रयोज्याः कुशलेन नित्यम् ॥११
श्यामात्रिभङ्गीत्रिफलासु सिद्धं हरिद्रया तिल्वकवृत्वकेण।
तं सदुग्धं व्रणतर्पणेन हन्याद्गतिं कोष्ठगतापि या स्यात् ॥१२॥

इति श्यामाद्यघृतम्।

नाड़ीं कफोत्थामुपनाह्य पूर्वं कुलत्थसिद्धार्थकशक्तुविल्वैः।
दूरगतामेकगतिं विदित्वा निपातयेच्छस्त्रमशेषकारि ॥ १३ ॥
यात् व्रणे निम्बतिलाग्निदन्तीसुराष्ट्रजाः सैन्धवसंप्रयुक्ताः।
क्षालने चापि करञ्जनिम्बजात्यर्कपीलुस्वरसाः प्रयोज्याः ॥१४
सर्जिकासिन्धुदन्त्यग्नि यूथिका जलनीलिका।
खरमञ्जरिवीजेषु तैलं गोमूत्रसाधितम् ॥
दुष्टव्रणप्रशमनं कफनाड़ीव्रणापहम् ॥ १५ ॥

इति सर्जिकाद्यं तैलम्।

[redacted]वाचमरिचज्वलनाख्यैः कारवेल्लरजनीद्वयसिद्धम्।
[redacted]मेतदचिरेण निहन्याद् दूरगामपि कफानिलनाड़ीम् ॥१६॥

इति सैन्धवाद्यं तैलम्।

[redacted]ड़ीन्तु शल्यप्रभवां विदार्य्य निष्कास्य शल्यं प्रविशोध्य मार्गम्।
[redacted]व्रणं चौद्रघृतप्रगाढ़ं निम्बां स्तिलान् शोध्यच रोपयेच्च ॥१७॥
[redacted]कखर्जूरकपित्थविल्ववनस्पतीनाञ्च शलाटुवर्गे।
[redacted] कषायं विपचेत्तु तैलमवाप्य मुस्तं सरलं प्रियङ्गुम् ॥ १८॥
[redacted]म्भिकं मोचरसाहिपुष्पं लोध्राणि दत्त्वा खलु धातकीं च।
[redacted] शल्यप्रभवा हि नाड़ी रोहेद्व्रणो वा सुखमाशु चैव ॥१९॥

इति कुम्भिकाद्यं तैलम्।

[redacted]सुह्यर्कदुग्धदार्वीणां वर्त्तिं कृत्वा प्रपूरयेत्।
[redacted]एष सर्वशरीरस्थां नाड़ीं हन्यात्प्रयोगराट् ॥ २० ॥
[redacted]आरग्वधनिशाकालं चूर्णयेत् चौद्रसंयुतम्।

अजितमपि भेषजशतैः पीनसरोगं व्यपोहाज्जयति।
नृपतिरसायनमेत दाहारयन्नपारहितश्च॥ ३९॥

इति राजरसायनम्।

ासापाके पित्तहृत्संविधानं कार्य्यं सर्वं वाह्यमाभ्यन्तरञ्च।
हत्वा रक्तं चीरवृक्षत्वचश्च योज्याः सेकाः सघृताश्च प्रदेहाः॥४०॥
र्जार्जुनोदुम्बरवल्कलानां त्वचां कषायैः परिधावनीयः।
षायकल्कैरपि चैभिरेव सिद्धं घृतं घ्राणविपक्वनुत्परम्॥४१॥

पूयास्रे रक्तपित्तघ्नाः कषाया नावनानि च।
पाकदाहादिरोगेषु शीतलेपादिकाः क्रियाः॥ ४२॥

ान्ते सम्यक् चावपीड़ं विदध्यात्तीव्रं धूमं शोधनं चात्र नस्यम्।
ेयं नस्यं मूर्द्धवैरेचनीयैर्नाड्या चूर्णं चुद्गदे भ्रंशथौ वा॥ ४३॥

घृतगुग्गुलुमिश्रस्य सिक्थकस्य प्रयत्नतः।
धूमः चवथुरोगघ्नो भ्रंशथुघ्नश्च निर्दिशेत्॥ ४४॥

पिप्पलीकुष्ठमहौषधानां विडङ्गमृद्वीककषायकल्कैः।
लं विपक्वं चवथौ च नस्यं वसां पचेत्तैलमधो घृतञ्च॥ ४५॥

इति पिप्पलीतैलम्।

व्याणि यानि चवथौ प्रदिष्टान्येतानि सर्वाणि सकट्फलानि।
र्णानि कृत्वा प्रधमेत नस्ये शस्तश्च दत्तं चवथुं निहन्यात्॥४६॥

शुण्ठिकुष्ठकणाविल्व द्राचाकल्ककषायवत्।
साधितं तैलमाज्यञ्च स्याद्धि चवथुरुग्जये॥ ४७॥

इति शुण्ठीतैलं घृतं च।

ीप्ते रोगे पित्तहृत् संविधानं कार्य्यं सर्वं माधुरं शीतलञ्च॥४८॥
स्यं हितं निम्बरसाञ्जनाभ्यां दीप्ते शिरः स्वेदनमल्पशस्तु।
स्ये कृते चीरजलावसेकान् शंसन्ति भुञ्जीत च मुद्गयूषैः॥४९॥
ासानाहे स्नेहपानं प्रधानं स्निग्धा धूमा मूर्द्धवस्तिश्च नित्यम्।
लातैलं सर्वथैवापि युञ्ज्याद्वातव्याधावन्यदुक्तं च यद्यत्॥५०॥

कलुषत्वञ्च नेत्रस्य विस्रमंस्रटलापहम् ।
बहुनात्र किमुक्तेन सर्वान् नेत्रामयान् हरेत् ॥ ४०७ ॥
यस्य चोपहता दृष्टिः सूर्य्याग्निभ्यां प्रणश्यते ।
तस्मै तद्भेषजं प्रोक्तमूर्द्ध्वजत्रुगदापहम् ॥ ४०८ ॥
यथादर्शो मले नीते निर्मलत्वं नियच्छति ।
तद्वदेतेन पीतेन दृष्टिर्निर्मलतां व्रजेत् ॥ ४०९ ॥
वारिद्रोणद्वयञ्चैव तुषभङ्गकयोस्तुले ॥ ४१० ॥

इति द्वितीयं महात्रिफलाद्यं घृतम्

कृष्णा सशर्करा द्राक्षा चतुर्मधुकयष्टिका ।
एकद्वित्रिचतुर्थांश भागाः सर्वेषु कल्पिताः ॥ ४११ ॥
मृद्वग्निना पचेद्धीमान् बहुदर्व्या विघट्टयन् ।
भास्कराख्यमिदं सर्पिर्ब्रह्मणा निर्मितं पुरा ॥ ४१२ ॥
तिमिरं शुक्लिकं हन्ति पिल्लं वाष्पुषितानि च ।
अदृष्टिं मन्ददृष्टिञ्च दिवा नक्ताख्यमेव च ॥ ४१३ ॥
अस्योपयोगादत्यन्तं संहारादतिवर्त्तयेत् ।
वयस्तम्भनमायुष्यं बलीपलितनाशनम् ॥
प्रदरञ्च क्षयं श्वासं शुक्रमूत्रमलार्त्तिनुत् ॥ ४१४ ॥

इति भास्कराद्यं घृतम्

पटोलं कटुकं दार्वी निम्बवासा फलत्रिकम् ।
दुरालभा पर्पटकं त्रायन्ती घनचन्दनम् ॥ ४१५ ॥
किराततिक्तयष्ट्याह्वे पिप्पली कौटजं फलम् ।
लामज्जकं मृणालञ्च तत्फलं च समं भवेत् ॥ ४१६ ॥
एतैस्तु कार्षिकैः कल्कैर्विपचेत् सर्पिरुत्तमम् ।
आमलक्या रसं देयं शतावर्य्याः समन्वितम् ॥ ४१७ ॥
सुरदारुकषायञ्च भृङ्गराजरसं तथा ।
प्रस्थं प्रस्थञ्च गृह्णीयात् द्विप्रस्थं सर्पिषः पचेत् ॥ ४१८

शाल्मलिकाजकर्णी च वाजिगन्धा शतावरी ॥ ४३५ ॥
कार्पासी पृश्निपर्णी द्वे वह्निश्चैवापराजिता।
कञ्चुकी तालमूली च द्रवन्ती पलाशिका ॥ ४३६ ॥
ग्रन्थिकं चित्रकं चैव विश्वेदेवा वचामृता।
बाणपुष्पी च पाठा च बिम्बी वरुण एव च ॥ ४३७ ॥
शिग्रुः कुलिशभृङ्गी च मुण्डी च कोकिलाख्यकः।
अर्कक्षीरं शताह्वा च वचाचव्यफलत्रिकम् ॥ ४३८ ॥
यवानी चाजमोदा च द्विजीरं धान्यतण्डुलाः।
विडङ्गमुस्ततालीशं निशे लवणपञ्चकम् ॥ ४३९ ॥
एलापुष्करनागाह्व त्वक्पत्रं हस्तिपिप्पली।
फलीकुष्ठं शटी रेणु जलहिङ्गु सबालकम् ॥ ४४० ॥
पाषाणभेदो वृक्षाम्ल भद्रोत्कटवितुन्नकः।
पलिका भागतो ग्राह्या गुडूचीविश्वदारुकात् ॥ ४४१ ॥
स्नुहीपलाशमत्स्याक्षी शिखरीविड़कं कणा।
स्वर्जिका यावशूकाख्या चैषां क्षारः पलोन्मितः ॥ ४४२ ॥
अभ्रकस्य पलान्यष्टौ चत्वारि गन्धकस्य च।
पलद्वयरसं ग्राह्यं लोहं चाष्टपलं तथा ॥ ४४३ ॥
गवाक्षी भृङ्गकेशी च शालिश्च केशराजकम्।
माणकन्दः कटिल्लश्च दहनो हस्तिकर्णकः ॥ ४४४ ॥
भल्लातमुसलीशुण्ठी त्रिफला वज्रवल्ल्यपि।
एषां रसे पृथग्लोहं पुटयेन्मर्दयेत्तथा ॥ ४४५ ॥
ग्रन्थिमान्मारिषश्चैव क्षारं वृहतिका तथा।
उत्कटो लोहितो वह्नि माणो बाणरसैः शुभैः ॥ ४४६ ॥
पुटयेदभ्रकञ्चैव मयसश्च यथाविधिः।
काकमाचिकपिण्डेन पयसा संयुतेन च ॥ ४४७ ॥
यावत्पिण्डो भवेत्तावच्छास्त्रविन्मृदुवह्निना।

अस्यते त्रिष्वपि हितो व्यायामो दोषपाचनः ॥
भुक्तं विरुद्धमप्यन्नं व्यायामान्न प्रदुष्यति ॥ ६४ ॥
अशाकभोजी घृतमत्ति योऽन्नमा पयोरमान् सेवति नातियोऽम्भः ।
निरामभुग्वातकृतां विदाहिनां न च प्रभुग्जीर्णभुगल्पकृत्क्रमः ॥ ६५ ॥
नगरी नगरस्येव रथस्येव रथी सदा ।
स्वशरीरस्य मेधावी कृत्येष्ववहितो भवेत् ॥ ६६ ॥

इति वङ्गसेनसङ्कलितः अनागताबाधप्रतिषेधाधिकारः समाप्तः ।

---

## अथ द्रव्यगुणाधिकारमाह ।

चक्षुष्यो मधुरो वृष्यो बल्यो धातुविवर्द्धनः ।
अम्लोऽग्नीमतो हृद्यः क्लेदी दीपनपाचनः ॥ १ ॥
दीपनो ज्वरतृष्णाघ्नः स्निग्धः शोधनरोपणः ।
पीडनो लेखनः स्तम्भी कषायो ग्राहिरोपणः ॥ २ ॥
रसवीर्य्यविपाकानामाश्रयाद्द्रव्यमुत्तमम् ।
उत्तरोत्तरसंश्लेषादितरेषां प्रधानता ॥ ३ ॥
मतिक्तलवणं कुष्ठं स्वल्पवातविषापहम् ।
स्वादुपाकरसो ज्ञेय स्तगरः कुष्ठवद्गुणैः ॥ ४ ॥
बल्याश्वगन्धा वातघ्नी कासश्वासक्षये हिता ।
देवदारु भवेत्तद्वत्कासश्वाससयापहम् ॥ ५ ॥
मोषणं लघु च शीतञ्च सुगन्धि कटुकं गुरु ।
वातपित्तहरा बल्या वृष्या संग्राहिणी बला ॥ ६ ॥
श्रीफलैरण्डमूलानि शूले वातकफोल्वणे ।
पृश्निपर्णी स्थिरा चैव पित्तश्लेष्मातिसारिणाम् ॥ ७ ॥
वातभोजनसंस्कारे शस्यते वातभूयसाम् ।
चक्षुष्यं वातपित्तघ्नं वर्ण्यं लोहितचन्दनम् ॥ ८ ॥

